अनिवार्य I  उपशास्त्री II वर्ष  19-06-2021

संस्कृत सामान्यम्  शब्द रूप

"क्विप्" प्रत्ययेन निर्मितः तकारान्त पुल्लिङ्ग शब्दः "भूभृत्।"

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा - | भूभृत् | भूभृतौ | भूभृतः |
| द्वितीया - | भूभृतम् | भूभृतौ | भूभृतः |
| तृतीया - | भूभृता | भूभृद्भ्याम् | भूभृद्भिः |
| चतुर्थी - | भूभृते | ,, | भूभृद्भ्यः |
| पञ्चमी - | भूभृतः | ,, | ,, |
| षष्ठी - | ,, | भूभृतोः | भूभृताम् |
| सप्तमी - | भूभृति | भूभृतोः | भूभृत्सु |
| सम्बोधन - | हे भूभृत्! | हे भूभृतौ! | हे भूभृतः! |

एवं प्रकारेण सुहृद् शब्दस्य रूपम् भवति। 'क्विप्' प्रत्ययस्य सर्वापहार लोपः भवति।

[signature] 19-06-2021

डॉ० निर्मल कुमार झा, सं० प्राचार्य

रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

19-06-2021

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यपत्रम् ।

## शब्दरूपाणि ।

### नदी ईकारान्तः स्त्रीलिंगः शब्दः ।

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | नदी | नद्यौ | नद्यः |
| द्वितीया | नदीम् | ,, | नदीः |
| तृतीया | नद्या | नदीभ्याम् | नदीभिः |
| चतुर्थी | नद्यै | ,, | नदीभ्यः |
| पञ्चमी | नद्याः | ,, | ,, |
| षष्ठी | ,, | नद्योः | नदीनाम् |
| सप्तमी | नद्याम् | ,, | नदीषु |
| सम्बोधन | हे नदि ! | हे नद्यौ ! | हे नद्यः ! |

### लता आकारान्तः स्त्रीलिंगः शब्दः ।

| | | | |
|---|---|---|---|
| प्रथमा | लता | लते | लताः |
| द्वितीया | लताम् | ,, | ,, |
| तृतीया | लतया | लताभ्याम् | लताभिः |
| चतुर्थी | लतायै | ,, | लताभ्यः |
| पञ्चमी | लतायाः | ,, | ,, |
| षष्ठी | लतायाः | लतयोः | लतानाम् |
| सप्तमी | लतायाम् | ,, | लतासु |
| सम्बोधन | हे लते ! | हे लते ! | हे लताः ! |

19-06-2021

डॉ० निर्मल कुमार झा (स० प्राचार्य
रा० उ० सं० महाविद्यालय सम्बद्धेना परीक्षित

साहित्यम् ।  शास्त्री I

शिशुपालवधम् ।  संस्कृतश्लोकव्याख्या ।

"अनिर्लोडितकार्यस्य वाग्जालं वाग्मिनो वृथा ।
निमित्तादपराद्धेषोर्धानुष्कस्येव वल्गितम् ॥"

व्याख्या → पद्यमिदं महाकविश्रीमाघप्रणीतस्य 'शिशुपालवध' महाकाव्यस्य द्वितीयसर्गात् उद्धृतमस्ति । अत्र बलरामः नीतिशास्त्ररटनेन किं प्रयोजनम्, सर्वथा कार्यतत्त्वम् एव अवगन्तव्यम् इति एतत् दर्शयितुम् आह →

अन्वयः → अनिर्लोडितकार्यस्य वाग्मिनः वाग्जालं निमित्ताद् अपराद्धेषोः धानुष्कस्य वल्गितम् इव वृथा ।

भावार्थः → कार्याकार्यमजानतो वाचालस्य वचनं लक्ष्यच्युतसायकस्य धनुर्धारिण आत्मश्लाघेव व्यर्थं भवति ।

शब्दार्थः व्याकरणञ्च → न निर्लोडितम् अनिर्लोडितम्, अनिर्लोडितं कार्यं येन असौ अनिर्लोडितकार्यः, तस्य अनिर्लोडितकार्यस्य = अनवलोकितकार्यस्य, कार्यम् अकार्यम् अजानत इत्यर्थः । वाचः अस्य सन्ति इति वाग्मी, तस्य वाग्मिनः = वाचालस्य । वाचां जालं वाग्जालम् = वाग्आडम्बरः । निमित्तात् = लक्ष्यात् । अपराद्धः इषुर्यस्य सः अपराद्धेषुः, तस्य अपराद्धेषोः = स्खलितबाणस्य । धनुः प्रहरणम् अस्य धानुष्कः, तस्य धानुष्कस्य = धनुष्मतः धनुर्धरस्य वा । वल्गितमिव = आत्मश्लाघेव । वृथा = निरर्थकम् ।

अलङ्कारः :- अर्थान्तरन्यासः । सामान्यकथनस्य विशेषेण पुष्टिः ।

छन्दः :- अनुष्टुप् ।

(हस्ताक्षर) 19-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्य ।
श्री० उ० सं० महावि० सुरवसेना, पूर्णियाँ ।

अनिवार्यपत्रम्। शास्त्री- II
व्याकरणछात्रेभ्यः। रघुवंशम्। श्लोकव्याख्या।

"सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः॥"

सन्दर्भः→ कुलगुरुकविकालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य इन्दुमतीस्वयंवरवर्णनात् षष्ठसर्गादुद्धृतोऽयं श्लोकः।

प्रसङ्गः→ स्वयंवरस्थले सुनन्दा या इन्दुमत्याः परिचारिका सखी वा आसीत्, सा इन्दुमतीं प्रति यथाक्रमं राजपरिचयं कारयामास। इन्दुमती राजानं विहाय तथैवाग्रे गतवती यथा नदीमार्गे वर्तमानं पर्वतं परित्यज्य पुरो गच्छति।

अन्वयः→ पतिंवरा सा रात्रौ सञ्चारिणी दीपशिखा इव यं यं व्यतीयाय (गता), स स भूमिपालः नरेन्द्रमार्गाट्ट इव विवर्णभावं प्रपेदे।

शब्दार्थः व्याकरणञ्च→ पतिंवरा→ पतिं वृणोति इति = स्वयंवरा। सा = इन्दुमती। रात्रौ = रजन्याम्। सञ्चारिणी = विचरणशीला। दीपशिखा→ दीपस्य शिखा = अर्चिः ज्वाला। इव = यथा। यं यं = राजानम्। व्यतीयाय = व्यतिक्रम्य, परित्यज्य, निर्गता। सः सः = राजा। भूमिपालः = नरेशः। नरेन्द्रमार्गाट्ट→ नरेन्द्रस्य मार्गे अट्टः = राजपथगृहम्। इव = यथा। विवर्णभावं = कान्तिहीनत्वम्। प्रपेदे = लेभे।

तात्पर्यः→ इन्दुमती दीपशिखा इव। यथा दीपशिखा उज्ज्वलवर्णा, कृशा, कम्पायमाना तथैव इन्दुमती तथा च तस्याः गमनम्। यथा प्रकाशपुञ्जे गते राजपथस्थितगृहाणि प्रकाशहीनानि भवन्ति तथा राजानः इन्दुमत्योपेक्षया कान्तिहीनत्वमलभन्।

विशेषः→ अस्मिन् श्लोके विप्रलम्भशृङ्गारः, वैदर्भीरीतिः, प्रसादगुणः, उपमालंकारः, उपजातिछन्दश्च।

19-06-2021
डॉ॰ निर्मलकुमार झा, (स॰ प्राचार्यः)
रा॰उ॰सं॰ महावि॰ सुरवसेना, पूर्णियाँ।